# रघुवंशमहाकाव्यप्रथमसर्गे कालिदासोपमावैशिष्ट्यम्

• **Dr. A GUNASEELAN**

**प्रस्तावना** - संस्कृतवाङ्मयं द्विविधं भवति लौकिकं , वैदिकञ्चेति। तत्रापि कृत्स्नस्य वाङ्मयस्य त्रैविध्यमामनन्ति पण्डिताः प्रभुसम्मिताः वेदाः , सुहृत्सम्मितानि पुराणानि , कान्तासम्मितानि काव्यानि इति। तत्र वैदिकवाङ्मये संहिताः , आरण्यकानि, ब्राह्मणानि, उपनिषदः अन्तर्भवन्ति। लौकिकवाङ्मये पुराणानि, इतिहासः, काव्यानि च अन्तर्भवन्ति। तत्र काव्यानि कान्तासम्मिततया हृदयानुरञ्जकानि , अलङ्गारसहितानि, उपदेशयुक्तानि च भवन्ति। ऐतरेयब्राह्मणे शुनश्शे फादि आख्यानेषु काव्यागुणाः दृश्यन्ते।[1]संस्कृतसाहित्ये काव्यरचना वाल्कीकिरामायणादारब्धमासीत्।

काव्यं दृश्यश्रव्यभेदेन द्विविधं भवति। नाटकादीनि रूपकाणि दृश्यकाव्यानि , रघुवंशादि काव्यानि श्रव्यकाव्यनीति कथ्यन्ते। परन्तु दृश्यश्रव्यकाव्यलेखनं विशिष्ठख्यातिं लब्धवान् कालिदासमहाकविः।

**कालिदासमहाकवेः परिचयः** - भारतीयकवीनाम् अग्रगण्यः कविकुलस्य गुरुः कालिदासः संस्कृतसाहित्यजगति आदर्शकविरूपेण विराजते। कालिदासस्य कालविषये जन्मस्थलविषये च बहवोऽभिप्रायभेदाः वर्तन्ते। ई .पू. अष्टशताब्द्यारभ्य एकादशताब्दिपर्यन्तं न निश्चितो कालः विमर्शकैः सूचितः। केचन भोजस्य आस्थानकविरिति , केचन विक्रमादित्यबिरुदाङ्कितस्य यशोधर्मस्य आस्थानकविरिति, चन्द्रगुप्तस्य काले नवरत्नेष्वासीदिति च बहुधा क्लेश करं भवति कालनिर्णयः। तथैव जन्मस्थलविषये बैंगाल्वासीति, काश्मीरवासीति, विदर्भदेशवासीती च निर्णयः कुर्वन्ति केचन विमर्शकाः। अतः देशकालविषये सर्वथा अभिप्रायभेदाः सन्त्येव।

**कालिदासस्य काव्यानि** - कालिदासः रघुवंशम्, कुमारसम्भवमिति महाकाव्यद्वयं, मेघदूतम्, ऋतुसंहारमिति खण्डकाव्यद्वयं, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयं, मालविकाग्निमित्रमिति नाटकत्रयं व्यरचयत्।

**कालिदासस्य कवितावैशिष्ट्यम्** -

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

इति श्लोकाधारेण कालिदासः उपमालङ्कारप्रयोगे सुप्रसिद्धः इति ज्ञायते। कालिदासेन विरचितकाव्येषु अनेकत्र उपमालङ्कारप्रयोगाः दृश्यन्ते। प्रधानतयारघुवंशे प्रकृतिवर्णनावसरे दिलीपस्य गुणवैभववर्णनावसरे च उपमालङ्कारः अद्वितीयः इव भासते।

**रघुवंशकाव्यपरिचयः** - रघुवंशमहाकाव्यं नवदशसर्गात्मकं भवति। अस्मिन् काव्ये दिलीपादारभ्य अग्निवर्णपर्यन्तं रघुवंशमहाराजानामितिवृत्तं ग्रथितं वर्तते। अस्मिन् काव्ये प्रथमसर्गात् नवसर्गपर्यन्तं दिलीप – अज – रघु – दशरथानां चरित्राणि वर्णितानि।नवमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं श्रीरामचरित्रमभिवर्णितम्। अन्तिमं चतुर्षु सर्गेषु कुशादारभ्य अग्निवर्णपर्यन्तं चतुर्विंशति राजानां चरित्रं वर्णितं वर्तते। कालिदासकाव्येषु रघुवंशमहाकाव्यं सुप्रसिद्धमिति कारणात् कालिदास क इह रघकारे न

---

• **Head and Assistant Professor, Department of Sanskrit, Sourashtra College, Madhurai**

रमते इति रघुकार इत्याहूयन्ते। महाकाव्यलक्षणानि सर्वाणि रघुवंशे समाहितानि। रघुवंशकाव्ये अङ्गिरसः वीरः, अग्निवर्णवृन्तान्ते श्रुङ्गारः , अजविलापे करुणः , आश्रमवर्णने शान्तः , रघुमहाराजवर्णने दानवीरः इत्याद्यनेके रसाः अङ्गाङ्गित या पोषितास्सन्ति। रघुवंशस्य व्याख्यानान्यपि सरलशैल्या सुबोधकरूपेण पाठकान् सहृदयान् च आह्लादयन्ति।

**रघुवंशप्रथमसर्गे कालिदासस्य उपमालङ्काराः** - अलङ्कारो नाम शोभाकारकः कश्चित् पदार्थः। अलङ्क्रियते इति अलङ्कारः अथवा अलङ्करोतीति अलङ्कारः इति व्युत्पत्तिः। यथा लोके कटककुण्डलादयोऽलङ्काराः शरीरमाभूषयन्ति तथा रसाद्यलङ्काराः काव्यशरीरमाभूषयन्ति। भामहः प्रथम आलङ्कारिक इत्युच्यते। भामहात् पूर्वम् ऋग्वेदादि प्राचीनग्रन्थेष्वपि उपमायाः उल्लेखः दृश्यते ---

**अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्।**
**जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः।** [2]

यास्केन निरुक्तेऽपि उपमायाः लक्षणं विवेचितम्। मम्मटाचार्येण काव्यप्रकाशे उपमायाः लक्षणमित्थं प्रतिपादितम् –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**[3]

अलङ्कारशास्त्रे अलङ्काराणां शब्दगतत्वेन, अर्थगतत्वेन, शब्दार्थोभयगतत्वेन च व्यवस्थितेः।

छेकानुपास – वृत्त्यानुप्रास – स्फुटानुप्रास – यमकमिति शब्दालङ्काराः, उपमा - रूपकमित्यादि अलङ्काराः अर्थालङ्काराः इति परिगण्यन्ते।

**उपमालङ्कारः** - संस्कृतालङ्कारक्षेत्रे सर्वेषामप्य लङ्काराणां मुकुटायमानः महान् विशिष्टः अलङ्कारः उपमालङ्कारः भवति। उपमायाः लक्षणं जयदेवस्य चन्द्रालोके एवं दृश्यते –'उपमा यत्र सादृश्य लक्ष्मीरुल्लसति द्वयोः'[4]इति। यत्र उपमान – उपमेययोः सादृश्यमुच्यते तत्र उपमालङ्कारः।

**रघुवंशे प्रथमसर्गे उपमालङ्काराः** - कालिदासः ग्रन्थारम्भे आशीर्नमस्क्रियारूपेण पार्वतीपरमेश्वरौ स्तौति यथा –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।** [5]

शब्दार्थाविव सम्मिलितौ भुवनस्य मातापितरौ गौरीशङ्करौ शब्दार्थयोः सम्यग् ज्ञानाय प्रणमामि इति कविः कालिदासः जगतः पितरौ स्तौति।

अत्र शब्दार्थ – मातापित्रोः सादृश्यमुक्तम्। नाम शब्दार्थसदृशयोः पार्वतीपरमेश्वर्योः शब्दार्थपरिज्ञानं प्रददात्विति नमस्करोति कालिदासः।

उपमानम् – शब्दार्थौ
उपमेयम् – पार्वतीपरमेश्वरौ
सादृश्यम् – ज्ञानप्रदानम्
उपमावाचकम् – इव

एवमत्रोपमानोपमेययोः शब्दार्थ – पार्वतीपरमेश्वर्योः सादृश्यकथनादुपमालङ्कारः। तथैव वैवस्वतोः वैशिष्ट्यं वर्णनावसरे उपमालङ्कारः अद्वितीयो दृश्यते-

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।**[6]

छन्दसां प्रणव इव मनीषिणां सम्माननीयः धराधिपतीनां प्रथमः सूर्यपुत्रः वैवस्वतमनु बभूव।

अत्र प्रणव – वैवस्वतोः सादृश्यमुक्तम्। यथा प्रणवः छन्दसामाद्यः तथैव वैवस्वतमनुः धराधिपतीनामाद्य इति सादृश्यरूपेण उपमालङ्कारो प्रयुक्तः।

उपमानम् – प्रणवः

उपमेयम् – वैवस्वतमनुः

सादृश्यम् – आद्यत्वम्

उपमावाचकम् – इव

तथैव दिलीपस्य वैभववर्णनावसरे यथा –

**तदन्वये शुद्धमति प्रसूतः शुद्धिमत्तरः।**

**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।।**[7]

पवित्रवैवस्वतमन्वन्तरे अतीवपूतः भूपचन्द्रः क्षीरसमुद्रौ इन्दुरिव दिलीपनाम्ना प्रसिद्धः प्रसूतः इत्यर्थः। अत्र इन्दुदिलीपयोः सादृस्यत्वात् उपमलङ्कारः भवति।

उपमानम् – इन्दुः

उपमेयम् – दिलीपः

सादृश्यम् – आह्लादकरत्वम्

उपमावाचकम् – इव

दिलीपस्य भार्यायाः सुदक्षिणायाः गुणवर्णनावसरे यथा-

**तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।**

**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।**[8]

दिलीपपत्नी मगधवंशोत्पन्ना सुदक्षिणा, यज्ञस्य पत्नी दक्षिणा इव सुप्रसिद्धा अभवत्।

अत्र दक्षिणासुदक्षिणयोः सा दृश्यकथनेन उपमालङ्कारः। परच्छन्दानुवर्तनाख्येन दक्षिणा पतिं व्रतमिवाचरती सुदक्षिणा सादृश्यरूपेण वर्णिते।

उपमानम् –दक्षिणा

उपमेयम् –सुदक्षिणा

सादृश्यम् –मार्गानुगमनम्

उपमावाचकम् – इव

वशिष्ठाश्रमगमनसन्दर्भे प्रकृतिवर्णनावसरे उपमालङ्कारः यथा –

**काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।**

**हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।** [9]

वशिष्ठाश्रमं गच्छतोः स्वच्छनेपथ्ययोः सुदक्षिणादिलीपयोः तुषारत्यक्तयोः चित्राख्यताराचन्द्रयोः इव कापि अनिर्वाच्या शोभा अभवत्।

अत्र चन्द्र – सुदक्षिणादिलीपयोः सादृश्यरूपत्वात् उपमालङ्कारः।

उपमानम् –चित्रानक्षत्रे चन्द्रः
उपमेयम् – सुदक्षिणादिलीपौ
सादृश्यम् – अनिर्वचनीयशोभा
उपमावाचकम्– इव

यथा चैत्रपूर्णिमायाः चित्रानक्षत्रचन्द्रः अनिर्वचनीयशोभां प्रसादयति तथैव शुद्धवस्रधारणे सुदक्षि णादिलीपौ तादृशी शोभां जनयतीत्य तः आह्लादकारोऽयम् उपमालङ्कारः। तथैव वशिष्ठस्य दर्शनसमये दिलीपेन दर्शितोऽयमलङ्कारः –

**विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्।**
**अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्।।**[10]

दिलीपः अरुन्धत्या सेव्यमानं वशिष्ठमहर्षिं स्वाहादेव्या सेव्यमानं हविर्भुजमिव दृष्टवान्।

अत्र अरुन्धतीसमेतवशिष्ठ – स्वाहादेवीसमेतहविर्भुजयोः सादृश्यमुक्तम्।

उपमानम् –स्वाहादेवीसमेतहविर्भुजः
उपमेयम् –अरुन्धतीसमेतवशिष्ठः
सादृश्यम् –अद्वितीयप्रकाशः
उपमावाचकम् – इव

एवमनेकत्र कालिदासस्य उपमालङ्कारप्रयोगाः रघुवंशमाहाकाव्ये द्रष्टुं शक्यते।

**टिप्पणी -**

1. संस्कृतसाहित्यचरित्रम् – पृ – 221
2. ऋग्वेदः - 1-124-7
3. काव्यप्रकाशः – 8- 67.
4. चन्द्रालोकः -1-1.
5. रघुवंशम् -1-1.
6. रघुवंशम् -1-11.
7. रघुवंशम् -1-12.
8. रघुवंशम् -1-31.
9. रघुवंशम् -1-46.
10. रघुवंशम् -1-56.

**उपयुक्तग्रन्थसूची -**

1. संस्कृतसाहित्यचरित्रम् – पि.यस्.तेलुगुविश्वविद्यालयः – हैदराबाद् ।
2. ऋग्वेदः - सायणाचार्यः, मोतीलाल् बेनारसीदास् – दिल्ली ।
3. काव्यप्रकाशः –मम्मटः, भारतीयविद्याप्रकाशन्, वाराणसी।
4. रघुवंशम् - कालिदासः, चौखम्बा संस्कृतसिरीज् - वाराणसी।

❖